श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ सप्तचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तचत्वारिंशः सर्गः ॥

## नावा सीतां गङ्गापारं नीत्वा लक्ष्मणेन तां प्रति दुःखेन तदीयपरित्यागवार्तायाः प्रकटनम्

अथ नावं सुविस्तीर्णां नैषादीं राघवानुजः।
आरुरोह समायुक्तां पूर्वमारोप्य मैथिलीम् ॥ **7.47.1** ॥

सुमन्त्रं चैव सरथं स्थीयतामिति लक्ष्मणः।
उवाच शोकसन्तप्तः प्रयाहीति च नाविकम् ॥ **7.47.2** ॥

ततस्तीरमुपागम्य भागीरथ्याः स लक्ष्मणः।
उवाच मैथिलीं वाक्यं प्राञ्जलिर्बाष्पसंवृतः ॥ **7.47.3** ॥

हृद्गतं मे महच्छल्यं यस्मादार्येण धीमता।
अस्मिन्निमित्ते वैदेहि लोकस्य वचनीकृतः ॥ **7.47.4** ॥

श्रेयो हि मरणं मेऽद्य मृत्युर्वा यत्परं भवेत्।
न चास्मिन्नीदृशे कार्ये नियोज्यो लोकनिन्दिते ॥ **7.47.5** ॥

प्रसीद च न मे पापं कर्तुमर्हसि शोभने।
इत्यञ्जलिकृतो भूमौ निपपात स लक्ष्मणः ॥ **7.47.6** ॥

रुदन्तं प्राञ्जलिं दृष्ट्वा काङ्क्षन्तं मृत्युमात्मनः।
मैथिली भृशसंविग्ना लक्ष्मणं वाक्यमब्रवीत् ॥ **7.47.7** ॥

किमिदं नावगच्छामि ब्रूहि तत्त्वेन लक्ष्मण।
पश्यामि त्वां न च स्वस्थमपि क्षेमं महीपतेः ॥ **7.47.8** ॥

शापितोऽसि नरेन्द्रेण यत् त्वं सन्तापमागतः।
तद् ब्रूयाः सन्निधौ मह्यमहमाज्ञापयामि ते ॥ **7.47.9** ॥

वैदेह्या चोद्यमानस्तु लक्ष्मणो दीनचेतनः।
अवाङ्मुखो बाष्पगलो वाक्यमेतदुवाच ह ॥ **7.47.10** ॥

श्रुत्वा परिषदो मध्ये ह्यपवादं सुदारुणम्।
पुरे जनपदे चैव त्वत्कृते जनकात्मजे ॥ **7.47.11** ॥

रामः सन्तप्तहृदयो मां निवेद्य गृहं गतः।
न तानि वचनीयानि मया देवि तवाग्रतः ॥ **7.47.12** ॥

यानि राज्ञा हृदि न्यस्तान्यमर्षात्पृष्ठतः कृतः।
सा त्वं त्यक्ता नृपतिना निर्दोषा मम सन्निधौ ॥ **7.47.13** ॥

पौरापवादभीतेन ग्राह्यं देवि न तेऽन्यथा।
आश्रमान्तेषु च मया त्यक्तव्या त्वं भविष्यसि ॥ **7.47.14** ॥

राज्ञः शासनमादाय तथैव किल दौर्हृदम्।
तदेतज्जाह्नवीतीरे ब्रह्मर्षीणां तपोवनम् ॥ **7.47.15** ॥

पुण्यं च रमणीयं च मा विषादं कृथाः शुभे।
राज्ञो दशरथस्यैव पितुर्मे मुनिपुङ्गवः ॥ **7.47.16** ॥

सखा परमको विप्रो वाल्मीकिः सुमहायशाः।
पादच्छायामुपागम्य सुखमस्य महात्मनः।
उपवासपरैकाग्रा वस त्वं जनकात्मजे ॥ **7.47.17** ॥

**पतिव्रतात्वमास्थाय रामं कृत्वा सदा हृदि।**
**श्रेयस्ते परमं देवि तथा कृत्वा भविष्यति॥ 7.47.18 ॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तचत्वारिंशः सर्गः॥